# Natha Navaratnamalika Manjusha

# નવરત્નમાલિકામઞ્જૂષા અથવા નાથનવરત્નમાલિકા

## Document Information

Text title : navaratnamAlikAmanjUShA or Nathanavaratnamalika

File name : navaratnamAlikAmanjUShA.itx

Category : deities_misc, nava

Location : doc_deities_misc

Author : maheshanAtha

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : June 5, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# નવરત્નમાલિકામઞ્જૂષા અથવા નાથનવરત્નમાલિકા

શ્રીગણેશાય નમઃ

શ્રીમહેશનાથકૃતા શ્રીનાથનવરત્નમાલિકા

શ્રીભાસુરાનન્દનાથવિરચિતયા
મઞ્જૂષાખ્યયા વ્યાખ્યયા સંવલિતા
શ્રીનાથાદિત્રિતયં નત્વા ગમ્ભીરરાયસૂરિસુતઃ ।
નાથનવરત્નમાલાગૂઢાર્થવ્યાવૃતિં તનુતે ॥

ઇહ ખલુ નિખિલોપાસનાઃ ગુરુપ્રસાદલભ્યાઃ, "ગુરુમૂલાઃ ક્રિયાઃ સર્વાઃ "
ઇતિ વચનાત્ ।
તત્પ્રસાદશ્ચ તત્સ્વરૂપોપાસ્તિમન્તરા દુર્લભઃ । તદ્રૂપં તુ ત્રિવિધમ્ -
સ્થૂલં, સૂક્ષ્મં, પરં ચેતિ । તેષુ આદ્યં, "સહસ્રદલપઙ્કજે
સકલશીતરશ્મિપ્રભમ્" ઇત્યાદિના કરણચરણાદ્યવયવવૈશિષ્ટ્યેણોક્તં
પ્રસિદ્ધમ્ । દ્વિતીયં તુ ગુરુપાદુકામન્ત્રરૂપમ્ । તૃતીયં વાસનાત્મકમ્ ।
તચ્ચ
રહસ્યત્વાત્ સઙ્કેતભાષયોપાસકાનુજિઘૃક્ષયા વિવૃણોતિ-

હંસઃ સોઽહં મન્ત્રમયૈઃ શ્વાસનિકાયૈ-
    ર્યા ગાયત્રી જન્તુષુ સર્વેષુ પિનદ્ધા ।
સન્નાવિરભૂદ્વાસનયા ય-
    સ્તં સન્માર્ગં મત્તમયૂરં ગુરુમીડે ॥ ૧॥

હંસ ઇતિ । પ્રાથમિકસૃષ્ટૌ યદ્બિન્દુત્રયં પ્રાદુરભૂત્ । તત્ર બિન્દુઃ
પુમાન્; વિસર્ગઃ પ્રકૃતિઃ; તાભ્યાં ક્રમેણ સ્વસ્ય વિશિષ્ટૌ
હકારસકારાવુત્પન્નૌ । સોઽહં હંસઃ, સ ત્વજપાનામકો મન્ત્રઃ ।
તસ્યૈવ વૈપરીત્યકથનેન સોઽહમિતિપરમાત્મમન્ત્રઃ; પરમાત્મનિ
યોગે તુ, "પરાપ્રાસાદમન્ત્રઃ" ઇત્યાદિશારદાયાં ચરમપટલેઽન્યત્ર
ચોક્તમ્ । તદિદં પરસ્પરભિન્નમન્ત્રપઞ્ચકમુચ્છ્વાસનિશ્વાસરૂપમ્ ।

“ઉચ્છ્વાસે ચૈવ નિઃશ્વાસે હંસ ઇત્યક્ષરદ્વયમ્ ।” ઇતિ વચનાત્ ।
સ ચ મન્ત્રઃ સર્વૈઃ પ્રાણિભિઃ અહોરાત્રસંમિતે કાલે
ષટ્શતાધિકૈકવિંશતિસહસ્ર(૨૧૬૦૦)માવર્ત્યતે । સોઽયમનાયાસેન જપઃ ।
તથાત્વેન જ્ઞાનમાત્રેણ મોક્ષપ્રદત્વાત્સર્વમન્ત્રોત્તમઃ । તદુક્તમ્-
“હંસઃ પદં પરેશાનિ પ્રત્યહં જપતે નરઃ ।
મોહાન્ધો યો ન જાનાતિ મોક્ષસ્તસ્ય ન વિદ્યતે ॥

શ્રીગુરોઃ કૃપયા દેવિ જ્ઞાયતે જપ્યતે તતઃ ।
તસ્માચ્છ્વાસૈશ્ચ નિઃશ્વાસૈસ્તદા બન્ધક્ષયો ભવેત્ ॥

અજપા નામ ગાયત્રી યોગિનાં મોક્ષદાયિની ।
તસ્યા વિજ્ઞાનમાત્રેણ નરઃ પાપૈઃ પ્રમુચ્યતે ॥

અનયા સદૃશી વિદ્યા ચાનયા સદૃશો જપઃ ।
અનયા સદૃશં પુણ્યં ન ભૂતં ન ભવિષ્યતિ ॥”
ઇતિ ચ તદુપાસનેતિકર્તવ્યતા શારદાયાં ચતુર્દશે પટલે, અન્યત્ર
ચ વિસ્તૃતેતિ નેહોચ્યતે । ગુરુદેવતામન્ત્રાણામૈક્યં ચ, તે સર્વે શ્વાસાઃ
નાથરૂપા એવ ।

અક્ષરાર્થસ્તુ - હંસ ઇત્યજપામન્ત્રાદિરૂપશ્વાસસમૂહાભિન્ના યા
ગાયત્રી સર્વપ્રાણિષ્વાચ્છન્ના વર્તતે, તદભિન્નઃ સન્ વાસનાત્મકરૂપેણ
યઃ પ્રાદુર્ભૂતઃ, તં ગુરું નૌમીતિ । સ એવ ચ ગુરુઃ, સતાં માર્ગઃ,
મુક્તિપુરગમનોપાયઃ ; ”ગુરુરુપાયઃ” ઇતિ શિવસૂત્રાત્ । આનન્દમન્ત્રો
હિ મયૂરઃ સ્વપિઞ્છાવયવાન્ પ્રસાર્ય નૃત્યકાલે યથા વિચિત્રરૂપો
દૃશ્યતે, તેન તથા કાલાન્તરે, અતઃ તસ્ય તદ્રૂપમાચ્છન્નમ્ । એવં
ગુરોરપિ વક્ષ્યમાણં વિચિત્રરૂપમાચ્છન્નમસ્તીતિ ગૌણ્યા મત્તમયૂરપદેન
ગુરુઃ સ્તૂયતે ।

અસ્મિન્ સ્તોત્રે દશાપિ શ્લોકાઃ મત્તમયૂરાભિધવૃત્તરૂપાઃ । તલ્લક્ષણં
ચોક્તં પિઙ્ગલમુનિના -
“મત્તમયૂરં મ્તૌ ય્સૌ ગ્સમુદ્ર(૪) નવકૌ” ઇતિ ।
મતયસગણાઃ ગુરુશ્ચ, પ્રતિપદં ચતુર્ભિર્નવભિશ્ચ
યતિરિતિ તદર્થઃ । પ્રકૃતેઽપ્યુક્તૈરેવ પદૈઃ સૂચ્યાર્થકથનાદિહ
મુદ્રાલઙ્કારઃ । તલ્લક્ષણં ચોક્તં ચન્દ્રાલોકે-
“સૂચ્યાર્થસૂચકં મુદ્રા પ્રકૃતાર્થપદૈ: પદૈઃ ।

  નિતમ્બગુર્વી તરુણી દૃગ્યુગ્મવિપુલાલસા ॥"
ઇતિ । સઙ્કેતરીત્યા અનુક્તશ્વાસસઙ્ખ્યાયા અપિ પદદ્વયેન સૂચનાત્ સ
એવાલઙ્કારઃ । તત્પ્રકારસ્તુ -

"ક-ટ-પ-ય-વર્ગભવૈરિહ પિણ્ડાન્ત્યૈરક્ષરૈરઙ્કા ।
નઞ્શૂન્યં વિજ્ઞેયં તથા સ્વરે કેવલે કથિતે ॥"
ઇતિ શ્લોકરીત્યા મકારઃ પઞ્ચસઙ્ખ્યાઙ્કે ; તકારઃ ષષ્ઠાઙ્કે ;
પુનર્મકારઃ પઞ્ચાઙ્કે, યકારરેફગકારાઃ એકદ્વિત્ર્યઙ્કેષુ
સઙ્કેતિતાઃ । તથા, "અઙ્કાનાં વામતો ગતિઃ"
ઇત્યુક્તરીત્યા લેખને કૃતે સતિ, મ ૫, ત્ત ૬, મ ૫, યૂ ૧, રે ૨,
પદેન એકવિંશતિસહસ્રાણિ પઞ્ચશતાનિ પઞ્ચષષ્ટિશ્ચ
કથિતાનિ ભવન્તિ । સન્; વિદ્યમાનો માર્ગઃ (૩૫)
યસ્મિન્નિતિ વ્યુત્પત્યા માર્ગશબ્દોક્તપઞ્ચત્રિંશત્સઙ્ખ્યયા અસ્યા મેલનેન
ષટ્શતાધિકૈકવિંશતિસહસ્રસઙ્ખ્યાનિષ્પત્તિ-(૨૧૬૦૦)રિતિ । એવમગ્રેઽપિ
સઙ્કેતોઽવગન્તવ્યઃ ॥ ૧॥

તન્ત્રરાજે હિ સપ્તવિંશે પટલે શ્વાસાનાં વાસનાદ્વયમુક્તમ્

"સઙ્ખ્યાભિર્વાસનાવ્યાપ્તિં શ્વાસાનાં શ‍ૃણુ સુન્દરિ ।
  યયા વિદિતયા મન્ત્રી સદા દર્શનવાન્ભવેત્ ॥"

ઇત્યાદિના । તયોઃ પ્રથમાં વાસનામુદ્યદિત્યાદિભિઃ ચતુર્ભિઃ શ્લોકૈઃ પ્રદર્શયતિ -

ઉદ્યદ્ભાસ્વન્મણ્ડલકાલાદ્દિનનિત્યા-
વિદ્યારૂપઃ પ્રાપ ષડથીનરભાવમ્ ।
યસ્તીર્થાત્મા મણ્ડલપૂર્ણાક્ષરવર્ષ્મા
તં સન્માર્ગં મત્તમયૂરં ગુરુમીડે ॥ ૨॥

ઉદ્યદિતિ । સૂર્યમણ્ડલોદયકાલમારભ્ય પ્રથમતઃ શ્વાસા
એકૈકદિનવિદ્યારૂપાઃ । અ આ ઇ ઈ ઇત્યારભ્ય ક્ષ: ક્ષાયૈ ઇત્યન્તા મન્ત્રાઃ
ષટ્ત્રિંશદધિકસપ્તદશોત્તરવિંશતિસહસ્રસઙ્ખ્યાકા (૫૭૬x૩૬=૨૦૭૩૬) ।
ષટ્ત્રિંશદ્વર્ણા અપિ ષોડશસ્વરસંયોગેનોક્તાઃ ૩૬x૧૬=(૫૭૬) પ્રતિદિનમેવં
ષટ્ત્રિશદ્દિનપર્યન્તં જપ્તાસ્તાવન્ત એવ ભવન્તિ । યતસ્તન્ત્રે પ્રસિદ્ધઃ
એતા એવ સ્વીદૈવત્યતયા વિદ્યા ઇત્યુચ્યન્તે । "સ્ત્રીદૈવત્યા સ્મૃતા વિદ્યા
પુંદૈવત્યાસ્તુ મન્ત્રકાઃ" ન ઇતિ કોશાત્ । ગુરુનાથસ્તુ તાવદ્રૂપઃ ।
તે ચ વિદ્યાયા અર્થા યોગિની હૃદયવ્યાખ્યાયામસ્માભિઃ પ્રપઞ્ચિતાઃ ।

ષડથીનરપદેન દિનનિત્યાવિદ્યાનાં સઙ્ખ્યોક્તાઃ (૨૦૭૩૬) । એવમુત્તરત્ર સર્વત્રાપિ સઙ્ખ્યાસઙ્કેતાક્ષરપદાનાં શ્રીગુરોઃ શ્લેષેણ દ્વ્યર્થતા અવસેયા । તત્પરતઃ ષટ્સપ્તત્યુત્તરપઞ્ચશતં (૫૭૬) શ્વાસાઃ પૂર્ણમણ્ડલાક્ષરરૂપાઃ । અકાર એકઃ, કકારાદિક્ષકારાન્તાઃ પઞ્ચત્રિંશદ્વ્યઞ્જનાનિ ચેત્યેવં ષટ્ત્રિંશદક્ષરાણાં પ્રત્યેકમકારાદિષોડશસ્વરસંયોગે સત્યુક્તસઙ્ખ્યાનિ (૫૭૬) અક્ષરાણિ ભવન્તિ । તાનિ પૂર્ણમણ્ડલપદેન દિનાર્ણવપદેન ચ તન્ત્રે વ્યવહ્રિયન્તે । તદભિન્નં વર્ષ્મા, શરીરં યસ્ય સઃ, તીર્થાત્મા (૫૭૬) ગુરુરૂપા એવ, "તીર્થમૃષિજુષ્ટજલે ગુરૌ" ઇત્યમરઃ ॥ ૨॥

તીર્થાત્માપદં ચોક્તસઙ્ખ્યાં (૫૭૬) વ્યનક્તિ -

તત્પશ્ચાત્યપ્રાણસમૂહનવનાથા<br>
    યઃ ષટ્ત્રિંશત્તત્ત્વમયઃ ષોડશ નિત્યાઃ ।<br>
એવં રીત્યા વાસિતસંધ્યાત્રયમૂર્તિ-<br>
    સ્તં સન્માર્ગં મત્તમયૂરં ગુરુમીડે ॥ ૩॥

તદિતિ । પૂર્ણમણ્ડલાત્ પરે નવ (૯) શ્વાસાઃ પ્રકાશાદિસુભગાન્તા નાથનવકરૂપાઃ । તતઃ પરે શિવાદિક્ષિત્યન્તતત્ત્વરૂપાઃ ષટ્ત્રિંશત્ (૩૬) । તદુત્તરં ત્રિપુરસુન્દરીકામેશ્વર્યાદિચિત્રાન્તરૂપાસ્તુ નિત્યાઃ ષોડશ (૧૬) । એત એવ ક્રમેણ સંધ્યાત્રયે ઉપાસ્યન્તે । તેન તદ્વાસનારૂપા ગુરુરેવેત્યર્થઃ ॥ ૩॥

શ્વાસૈઃ ષષ્ટ્યા ષષ્ટિઘટીદૈવતરૂપો (૬૦)<br>
    મેષપ્રષ્ટદ્વાદશરાશિ (૧૨) પ્રતિમાનઃ ।<br>
અર્કાદ્યાત્મા યો નવસઙ્ખ્યાગ્રહમૂર્તિ-<br>
    સ્તં સન્માર્ગં મત્તમયૂરં ગુરુમીડે ॥ ૪॥

શ્વાસૈરિતિ । તદનન્તરં વિસર્ગરહિતાનાં પઞ્ચાશન્માતૃકાણાં દશાક્ષરૈરેકૈકો વર્ગ ઇત્યેવં પઞ્ચ વર્ગાઃ; અ (૬૦), એ (૬૦), ચ (૬૦), ત (૬૦), ય (૬૦) માનઃ । તેષુ પ્રથમવર્ગસ્ય આદાવન્તે ચ જપે સતિ, ષષ્ટિર્વર્ણા અહોરાત્રઘટિકા રૂપા ભવન્તીતિ તન્ત્રે સ્પષ્ટમ્ । નિત્યશ્વાસાનન્તરં ષષ્ટિઃ શ્વાસાઃ તદ્દેવતાત્માનઃ (૬૦); તતો દ્વાદશ મેષાદિરાશિરૂપાઃ । પ્રષ્ટશબ્દોઽગ્રેસરવાચી સન્ પ્રભૃતિપરઃ, "પ્રષ્ટોઽગ્રગામિનિ" ઇતિ નિપાતનાત્ । (૧૨) તદુત્તરં નવ શ્વાસાઃ (૯) અર્કાદિનવગ્રહરૂપાઃ; તત્સ્વરૂપો ગુરુરિત્યર્થઃ ॥૪॥

પઞ્ચાત્મા ભૂતનિકાયો ગતમાયો યઃ

પઞ્ચાશદ્વર્ણ (૫૦) વપુશ્ચક્રગતાભિઃ ।
શક્ત્યાલીભિઃ સઙ્ગતિમાનેકનવત્યા
તં સન્માર્ગં મત્તમયૂરં ગુરુમીડે ॥ ૫॥

પઞ્ચાત્મેતિ । ગ્રહાત્મકશ્વાસાનન્તરં પઞ્ચ શ્વાસાઃ આકાશાદિપઞ્ચભૂતરૂપાઃ (૫) । તદુત્તરં પઞ્ચશચ્છ્વાસાઃ માતૃકારૂપાઃ (૫૦) તાસામેકપઞ્ચાશતો (૫૧) મધ્યેઽપિ સર્ગસ્વરત્યાગાત્તચ્છેષેણાહ - ગતમાય ઇતિ । માયાશબ્દોઽપિ સર્ગસ્વરવાચકઃ, તદ્રહિત ઇત્યર્થઃ । તદનન્તરમેકનવતિશ્વાસાઃ ચક્રશ્ચિદાવરણશક્તિસમૂહપરાઃ । તાસામેકનવતિત્વં (૯૧) મૂલ એવ નવમશ્લોકે વિશદીકરિષ્યતે । તતશ્ચ પૂર્વોક્તદિનનિત્યાવિદ્યા (૨૦૭૩૬) પૂર્ણમણ્ડલા (૫૭૬) નવનાથ (૯) તત્ત્વ (૩૬) નિત્યા (૧૬) ઘટિકા (૬૦) રાશિ (૧૨) નવગ્રહ (૯) ભૂત (૫) માતૃકા (૫૦) વર્ણશક્તિ (૯૧) સઙ્ખ્યાનામેકીકરણે શ્વાસસઙ્ખ્યાપૂર્તિઃ (૨૧૬૦૦) સંપદ્યતે । તદુક્તં તન્ત્રરાજે -

“નિત્યાતત્ત્વામિવિદ્યાનાં સઙ્ખ્યાઃ સ્યુઃ પૂર્વમેકશઃ ।
તતો દિનાર્ણાઃ સંધ્યાશ્ચ તતશ્ચ ઘટિકાર્ણકાઃ॥

રાશયો દ્વાદશ તતો ગ્રહભૂતાનિ પઞ્ચ વૈ ।
માતૃકાશ્ચાપિ પઞ્ચાશચ્છ્રીચક્રસ્થાશ્ચ શક્તયઃ॥

સૈકા નવતયઃ પ્રોક્તા દેવી સર્વાત્મના સ્થિતા ।”

ઇતિ । નિત્યાઃ ષોડશ (૧૬) સ્વરાઃ, તત્ત્વાક્ષરાણિ (૩૬) પૂર્વોક્તાનિ, તેષામામિઃ પરસ્પરસંયોગવિશેષરૂપઃ પ્રસ્તરઃ તત્સંવર્ધિતાનાં દિનનિત્યાવિદ્યાનામિત્યર્થઃ । શિષ્ટં સ્પષ્ટમ્ ॥ ૫॥

એતાવતા પ્રબન્ધેન શ્વાસાનામવયવશો વિભાગેન વાસના ઉપદિશ્યેદાનીં સંપૂર્ણસ્યૈવ શ્વાસસમૂહસ્યૈકૈકા વાસના ઉપદિશતિ -

યદ્વા પઞ્ચાશલ્લિપિપીઠૈકરદાના-
માવૃત્ત્યાસીદ્યઃ ફલવાન્ દેશિકવર્યઃ ।
જ્ઞાનોત્તુઙ્ગો (૩૬૦૦) ઽરલકસહષટ્કવૃતૈ-
સ્તં સન્માર્ગં મત્તમયૂરં ગુરુમીડે ॥ ૬॥

યદ્વેતિ । ઉક્તાનાં વક્ષ્યમાણાનાં ચ વાસનાનામન્યતમાનુસંધાને વિકલ્પદ્યોતનાર્થો વાકારઃ । ઇમાશ્ચ વાસના મૂલેઽનુક્તા અપિ

પૂજ્યપાદમુખાવગન્તવ્યા ઇતિ તુ મનોરમાકારઃ ।
“અથ ષોડશ નિત્યાનાં કાલેન પ્રાણતોચ્યતે ।
 માતૃકાભૂતનાથાદ્યૈઃ શ્રીચક્રેણ ચ શક્તિભિઃ ॥”

ઇતિ પટલારમ્ભપ્રતિજ્ઞાશ્લોકે સૂચિતા ઇતિ તુ નિધિકારઃ । કાલેન પ્રાણતઃ શ્વાસાત્મકકાલભેદઃ । અત્રાદ્યપદેન ગ્રહતત્ત્વનિત્યાઘટિકારાશયો ગૃહ્યન્તે । શ્રીચક્રશબ્દેન તદન્તર્ગતત્રૈલોક્યમોહનાદિનવચક્રાણિ । શક્તિશબ્દેન શ્રીચક્રસ્થાઃ ષણ્ણવતીઃ શક્તય ઉચ્યન્તે । વસ્તુતસ્તુ - માતૃકાપદેન ગણેશગ્રહનક્ષત્રયોગિનીરાશિપીઠાનાં લઘુષોઢાન્યાસદેવતારૂપાણાં ગ્રહાણાં, તૈઃ સહ માતૃકાભેદસ્તુ તન્ત્રરાજ એવ “ગણેશગ્રહનક્ષત્ર-” ઇત્યાદિદ્વાદશશ્લોકીસ્તવને કથનાત્ । ગુરુદેવ્યાઃ તૈઃ સહાભેદસ્તુ યોગિનીહૃદયે કૌલિકાર્યપ્રકરણે વર્ણનાત્; નિત્યાહૃદયે, “સંપ્રદાયોક્તં સ્ફુટોપાયેન ભાવયેત્” ઇતિ વચનેન યોગિનીહૃદયોક્તભાવનાસાપેક્ષતયા સ્વતન્ત્રે સ્વીકારાત્ । તસ્માદાદ્યપદેનનિત્યાતત્ત્વાદેરેવ ગ્રહણમ્; લિપયઃ, અકારાદ્યા વર્ણાઃ; પીઠાઃ, કામરૂપાદયઃ; એકરદાઃ, વિઘ્નેશ્વરાદયો ગણેશાઃ; એતે ત્રયોઽપિ ગતપ્રાયાઃ સન્તઃ પઞ્ચાશદેવ શ્વાસસઙ્ખ્યા, પિણ્ડસ્ય (૨૧૬૦૦) પઞ્ચાશતા વિભાગે દ્વાત્રિંશદુત્તરચતુઃશતી (૪૩૨) લબ્ધા । તેન તાવદ્વારમાવૃત્તા લિપ્યાદયો દેવશ્વાસા ઇતિ વાસનાત્રયમાવૃત્તિશ્ચ દણ્ડકલિતન્યાયેન સ્વસ્વસ્થાનવિવૃદ્ધ્યા વેતિ તુ ગુરુમુખાદેવ નિર્ણેયમ્ । ફલવાનિતિ પદેન લબ્ધસઙ્ખ્યોક્તિઃ (૪૩૨) । ડાકિન્યાદિયોગિનીષટ્કાત્મકતયા શ્વાસવાસનામાહ - જ્ઞાનેતિ । જ્ઞકારનકારૌ શૂન્યપરૌ, તકારગકારૌ ષટ્ત્ર્યઙ્કપરે । તેન ત્રિસહસ્રાણિ ષટ્શતાનીતિ જ્ઞાનોત્તુઙ્ગ (૩૬૦૦) પદેન સૂચિતાનીત્યર્થઃ । ષડ્ભિઃ શ્વાસસઙ્ખ્યાવિભાગે તાવત એવ લાભાત્ “ડરલકસહ” ઇત્યનેન નામૈકદેશેન નામગ્રહણમિતિ ન્યાયેન ડાકિન્યાદય ઉચ્યન્તે । યાકિન્યા સહ સપ્તસઙ્ખ્યા તુ નાશઙ્કનીયા । “શાક્તૈઃ ષડ્ભિર્યથાક્ષરૈઃ” ઇત્યાદિના યોગિનીહૃદયે ષણ્ણામેવ ગ્રહણમ્ । “યાકિન્યાઃ ષટ્સમષ્ટિરૂપત્વેન વ્યષ્ટિતો ભેદાભાવાત્ સપ્તાનાં ગ્રહણમ્” ઇત્યમૃતાનન્દવ્યાખ્યા તુ સેતુબન્ધ એવાસ્માભિર્નિરસ્તા ।

યત્તુ યોગિનીપદસ્ય વશિન્યાદ્યષ્ટકપરત્વેન કાશ્મીરાણાં વ્યાખ્યાનમ્; તત્પક્ષોઽપિ ન દોષઃ । અષ્ટભિઃ શ્વાસાનાં વિભાગોઽપિ સપ્તદશોત્તરસહસ્રદ્વયસ્ય લાભેન શ્વાસસઙ્ખ્યાયા નિઃશેષત્વસંભવાત્ ।

અત્રાવૃત્તેઃ પઞ્ચમાષ્ટમાક્ષરયોઃ ગુરુત્વસ્યાવશ્યકત્વેઽપિ તયોઃ સ્થાને દ્વિદ્વિલઘુનિવેશૌ, "લૌ સઃ" ઇતિ સૂત્રેણ લઘુદ્વયસ્ય ગુરુકાર્યકારિત્વવિધાનબલાત્સ્વીકૃતઃ । તત્સૂત્રસ્ય માત્રાચ્છન્દોવિષયકત્વેઽપિ વર્ણચ્છન્દસોઽપિ કતિપયવૃત્તેષુ તદઙ્ગીકારો જ્ઞાપકસિદ્ધ ઇતિ તુ છન્દોભાસ્કરાદૌ પ્રપઞ્ચિતમસ્માભિઃ । પ્રયોગેઽપિ; 'વન્દે રામં મરકતવર્ણં મુનિવન્દ્યમ્" ઇત્યાદિઃ ॥ ૬॥

નેત્રોદ્ગાઢો(૪૩૨૦)દેશિકરાડ્ભૂત(૫)સમૂહૈ-
 રેનો વારી યો નવનાથગ્રહચક્રૈઃ ।
નક્ષત્રસ્યાવૃત્તિભિરાનન્દશરીર-
 સ્તં સન્માર્ગં મત્તમયૂરં ગુરુમીડે ॥ ૭॥

નેત્રેતિ । નેત્રાંશે ઉદ્ગાઢો દૃઢ ઇત્યનેન દૂરદર્શિત્વાદિકં ગુરોરુક્તમ્ । પઞ્ચભૂતસઙ્ખ્યાયાઃ શ્વાસવિભાગે સતિ ચત્વારિ સહસ્રાણિ ત્રીણિ શતાનિ વિંશતિશ્ચ (૪૩૨૦) લભ્યન્ત ઇતિ તાવદ્વારં મારુતાઃ શ્વાસાઃ ગુરુરૂપા એવેત્યર્થઃ । નેત્રોદ્ગાઢપદેન તત્સઙ્ખ્યા દર્શિતા । નાથાદિનવકરૂપવાસનાત્રયમાહ - એનો વારીતિ । પાપહા મહાગુરુઃ ચતુઃશતાધિકસહસ્રદ્વયવ્યાવૃત્ત્યા નાથાદિદ્વય ઇત્યર્થઃ । દ્વયં વારા વૃત્ત્યાદિ (૨૪૦૦) નાથાદિરૂપ ઇત્યર્થઃ । નવનાથા નવગ્રહાઃ નવચક્રાણિ ચેતિ વાસનાત્રયમ્ । અષ્ટશતાવૃત્ત્યાગુરુર્નક્ષત્રરૂપોઽભૂદિત્યાહ - નક્ષત્રસ્યેતિ । જાતાવેકવચનમ્ । આનન્દ (૮૦૦) શબ્દેનોક્તસઙ્ખ્યા પ્રદર્શિતા ॥ ૭॥

નિત્યાવૃત્તાવીશલયઃ સન્નચલોઽભૂ-
 ન્નાડ્યાવૃત્તૌ રાશિષુ નાનાજપરૂપઃ ।
અભ્યસ્યદ્ભિસ્તત્ત્વગણૈરુન્નતમૂર્તિ-
 સ્તં સન્માર્ગં મત્તમયૂરં ગુરુમીડે ॥ ૮॥

નિત્યેતિ । ષોડશનિત્યાભિઃ (૧૬) શ્વાસાનાં (૨૧૬૦૦) વિભાગે સહસ્રોત્તરસાર્ધત્રિશતી (૧૩૫૦) લબ્ધા । ઈશે, પરમશિવે, લયો યસ્ય સ ગુરુઃ; તત્સઙ્ખ્યાકનિત્યાવૃત્તિરૂપઃ । "દશધ્યાનસમો લયઃ" ઇતિ લક્ષિતસમાધિવિશેષો લય ઇત્યુચ્યતે । ષષ્ટિનાડીદેવતાસઙ્ખ્યયા વિભાગે તુ અચલો ભવેત્, ષષ્ટ્યુત્તરશતત્રયસઙ્ખ્યો (૩૬૦) જાતઃ । રાશિષુ; રાશિવ્યાવર્તમાનેષુ, નાનાજપાત્મા; અષ્ટશત્યધિકસહસ્ર (૧૮૦૦) જપરૂપઃ ।

ષટ્ત્રિંશત્તત્ત્વગણાભ્યાસેન ઉન્નતસ્વરૂપઃ (૬૦૦) ષટ્શતસઙ્ખ્ય ઇત્યર્થઃ ॥ ૮॥

ધૃત્યુર્વીશાષ્ટેન્દ્રદિગાશાહિયુગત્રિ-
　પ્રોક્તાભિઃ પુંહેતિભિરમ્બાભિરભિન્નઃ ।
આવૃત્ત્યૈવં ષણ્ણવતેર્યઃ શિખરાત્મા
　તં સન્માર્ગં મત્તમયૂરં ગુરુમીડે ॥ ૯॥

ધૃતીતિ । ધૃતયોઽષ્ટાદશ (૧૮) દેવતાઃ, ભૂપુરસ્થાઃ અણિમાદયો દશ (૧૦); બ્રાહ્મ્યાદ્યા અષ્ટૌ (૮) કાદિમતે તૃતીયરેખાયા અકથનેન તત્રત્યમુદ્રાદેવતાદશકસ્યાભાવાત્ । ઉર્વીશાઃ ષોડશ (૧૬) કામાકર્ષિણ્યાદ્યાઃ ષોડશદલપદ્મસ્થાઃ, અષ્ટૌ (૮) અનઙ્ગઃ કુસુમાદયોઽષ્ટદલપદ્મસ્થાઃ । ઇન્દ્રાઃ ચતુર્દશ (૧૪) સર્વસઙ્ક્ષોભિણ્યાદયો મન્વશ્રગતાઃ । દિશો દશ (૧૦) બહિર્દશારગાઃ સર્વસિદ્ધિપ્રદાદયઃ । આશા અપિ દશ (૧૦) અન્તર્દશારગાસર્વજ્ઞાદ્યાઃ । અહયોઽષ્ટૌ (૮) વશિન્યાદ્યા અષ્ટકોણસ્થાઃ । અમ્બાયુધદેવતાશ્ચતસ્રઃ (૪); ત્રિકોણગતકામેશ્વર્યાદિદેવતાસ્તિસ્રઃ (૩) એતાઃ સંહત્યૈકનવતિ (૯૧) સઙ્ખ્યાકત્વેન પઞ્ચમશ્લોકે પ્રોક્તાઃ તાવતીનામેવ ગ્રહણે શ્વાસસઙ્ખ્યાયા એકનવત્યા વિભાગે નિઃશેષતાયા અસંભવાત્ વિભાજકાઙ્કે પઞ્ચાનાં મેલનેન ષણ્ણવતિત્વમાપાદયિતુમાહ - પુંહેતિભિરિતિ । કામેશ્વર્યાયુધદેવતાભિઃ ચતસૃભિરિત્યર્થઃ । ઇમાઃ પઞ્ચનવતિભિઃ (૯૯) અમ્બાભિરભિન્નસ્થાઃ પ્રધાનાંશેષ્વિત્યેકશેષાભિપ્રાયેણ અમ્બાભિરિત્યુક્તમ્ । એવંપ્રકારેણ ષણ્ણવતેર્દેવતાનામાવૃત્ત્યા શિખરાત્મા સર્વોત્તમસ્વરૂપો ગુરુઃ સપાદશતદ્વયાવૃત્તિમાનાસીદિત્યર્થઃ ।

નનુ ચ "ચક્રેણ શક્તિભિઃ" ઇત્યત્ર શક્તિસામાન્યવાચકસ્યાપિ પદસ્યૈકાનવતયઃ પ્રોક્તાઃ । "શ્રીચક્રસ્થાસ્તુ શક્તયઃ
" ઇત્યનેનોપસંહારાદેકનવતિદેવતાઃ સિદ્ધ્યન્તીતિ ન પુંહેત્યાદિ ગ્રહણે માનં પશ્યામઃ । ન ચ તયા સઙ્ખ્યયા શ્વાસસઙ્ખ્યાવિભાગે નિરવશેષતાસંભવાદેવ પઞ્ચાનામઙ્કાનાં યોગ ઇતિ વાચ્યમ્ । કસ્યાપિ કતિપયાન્યૂનતાદિકલ્પનેનાપિ સંભવાત્ । ધૃત્યાદિનવસઙ્ખ્યાભિઃ પ્રત્યેકં ૧૮, ૧૬, ૮, ૧૪, ૧૦, ૧૦, ૮, ૪, ૩ વિભજનેઽપિ તત્સંભવાદ્વા ઇન્દ્રસઙ્ખ્યયા વિભાગે દ્વાદશનામાન્યેતેષાં રાશિવાસનાકલ્પનાસંભવાત્ ।

ન ચૈવં વાસનાસાઙ્કર્યે યથાવસ્થિતૈકનવતિવિભાગશેષસ્યાપિ વાસનાન્તરકલ્પનયૈવોપપત્તૌ પ્રતિચિત્રદેવતાસઙ્ખ્યાનાં

પ્રાતિસ્વિકં વિભજકત્વકલ્પના ન સ્યાદિતિ વાચ્યમ્ । એકનવત્યા વિભાગે ત્રયસ્ત્રિંશતાવશેષેણ તસ્યોક્તમાતૃકાદિભિન્નત્વેન સ્વેચ્છયા દેવતાન્તરકલ્પનાયામવ્યવસ્થાપત્તિરિતિ ચેત્, મૈવમ્ । ઇહ સંપ્રદાયસ્યૈવ શરણત્વાત્ । અત એવ મનોરમાયાં શક્તિભિરિતિ પદમેકનવતિષણ્ણવતિપરત્વેન દ્વેધા વ્યાખ્યાયૈકત્ર વચનમન્યત્ર ગુરુમુખાગમ એવોત્તરગ્રન્થે પ્રમાણમુપન્યસ્તમ્। ઇદં તુ સુવચમ્ - શ્રીચક્રેણેતિ ચકારાત્ નવચક્રસઙ્ખ્યામેકનવતૌ સંમેલ્યોભયસમુચ્ચયરૂપયાંશસઙ્ખ્યયા નિરવશેષેણ વિભાગો વિધીયત ઇતિ ।

ન ચૈકનવત્યા વિભાજકત્વાયોગાત્ તદાધારચક્રનવકમેલનસ્ય ન્યાયસિદ્ધત્વેન મન્વશ્રેઽપિ તદાધારચક્રમાત્રસ્ય મેલનેન તાવન્માત્રાંશે પઞ્ચદશસઙ્ખ્યાયા વિભાજકત્વકલ્પને નિરવશેષતાસંભવાત્ ધૃત્યાદિભિઃ પાર્થક્યેન વિભાગઃ સિદ્ધ ઇતિ વાચ્યમ્ । મહાત્રિપુરસુન્દર્યા એકનવત્યનન્તર્ગતત્વાત્ તદાધારચક્રસ્ય તત્ર મેલને ઉપપત્ત્યભાવેન નવચક્રસઙ્ખ્યામેલનસ્ય વાચનિકત્વાઙ્ગીકારેણૈવ નિર્વાહાદિતિ દિક્ ॥ ૯॥

મહેશનાથકૃતસ્ય નાથનવરત્નમાલિકાનામ્નઃ સ્તવસ્યોપસંહારપૂર્વકં પાઠપરાણાં ગુરુભક્તાનાં શ્રીવિદ્યોપાસકાનાં સદ્યઃ પરશિવભાવપ્રાપ્તિઃ ફલતીત્યાહ -

ઇત્યગ્રન્થાદ્ભાસ્કરરાયો નવરત્નૈ-
મર્લાલામગ્ર્યાં નાથરહસ્યં ગમયન્તીમ્ ।
યેષામેષા કણ્ઠગતા તે જગદમ્બા
વિદ્યાભ્યાસાદત્ર જનુષ્યેવ મહેશઃ ॥ ૧૦॥

ઇતિ શ્રીમહેશનાથકૃતા નાથનવરત્નમાલા સમાપ્તા ।

ઇતીતિ । માલાસ્તોત્રયો રૂપકાનુગુણ્યાય પ્રબન્ધરચનમાલારચનોભયવાચિગ્રથિધાતુઃ પ્રયુક્તઃ । નાથરહસ્યં પરં રૂપમ્ । અત્ર જનુષ્યેવ; અસ્મિન્નેવ જન્મનિ, મહેશઃ; પરમ- શિવરૂપઃ । ઉક્તં ચ તન્ત્રરાજે; “એવંવિધાં ભાવનાં યો ભાવયેત્સ મહેશ્વરઃ” ઇતિ સર્વં શિવમ્ ॥ ૧૦॥

ઇતિ શ્રીમન્નાથનવરત્નમાલાભિધાસ્તુતેઃ ।
મઞ્જૂષા ભાસુરાનન્દનાથેનાકારિ ગુપ્તયે ॥

ઇતિ શ્રીમત્પદવાક્યપ્રમાણપારાવારપારીણધુરીણનિખિલ-
તન્ત્રસ્વતન્ત્રશ્રીમદ્ગમ્ભીરરાજભારતીદીક્ષિતસૂનુના
ભાસુરાનન્દનાથદીક્ષાભિધાનેન ભાસ્કરરાયેણ વિરચિતા
શ્રીનાથનવરત્નમાલાવ્યાખ્યા મઞ્જૂષા સમાપ્તા ।

Encoded and proofread by Sunder Hattangadi

*Natha Navaratnamalika Manjusha*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*